**अरसिक** त्रि० रसं वेत्ति रस+ठन् न०त०। रसानभिज्ञे "अरसिकेषु रहस्य निवेदनं शिरसि मा लिख" इत्युद्भटः।

**अराग** पु० अभावे न०। १ अनुरागाभावे रञ्जनाभावे च न०ब०। २ रागशून्ये त्रि०। "तमहमरागमतृष्णम्" वेणी०

**अरागिन्** त्रि० न रागी न०त०। विरक्ते स्त्रियां ङीप्।

**अराजक** त्रि० नास्ति राजा यत्र कप्। राजशून्ये देशादौ "अराजको हि लोकोऽस्मिन् सर्व्वतो विद्रुते भयात्" मनुः। [द्राजन्यप्रसूतितः" मनुः।

**अराजन्य** पु० न०त०। क्षत्रियभिन्ने "राज्ञो न धनमन्विच्छे-

**अराजिन्** त्रि० राजा अधिष्ठातृत्वेनास्त्यस्य ब्रीह्या० इनि न०त०। १ राजानधिष्ठिते "वि पर्व्वताः अराजिनः" ऋ० १,७,२२। अराजिनः राज्ञा केनचित्स्वामिना ऽनधिष्ठिताः" भा०। न राजते राज–इनि। २दीप्तिशून्ये त्रि० स्त्रियामुभयतो ङीप्।

**अराजीव** पु० अरम् चक्राङ्गं तत्साधनम् आजीवति आ+जीव अन् उप०स०। १रथकारे। राजीवं पद्मम् न०ब०। २पद्मशून्ये जलादौ त्रि०।

**अराति** पु० न राति ददाति सुखं रा+क्तिच् न०त०। १शत्रौ। "देशः, सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः" वेणी० अरिशब्दे विवृतिः। ज्योतिषोक्ते २षष्ठस्थाने। "आरातिव्रणयोः षष्ठे अष्टमे मृत्युरन्ध्रयोः" इत्युक्तेः षष्ठस्थाने अरिकृतशुभाशुभचिन्तनीयत्वात्तथात्वम्। कामादिष्वान्तर-रिपुषु ४षट्संख्यायां कामादीनामान्तररिपूणां संख्या-साम्यात्। ५अभिगमनशीले च "मा पान्यर्यो वसुधामरा-तयः" ऋ०७,८३,५,। "विश्वा अग्नौ अरातीः ऋ० ८,७६,२, अरातीः अभिगमनशीलाः शत्रवो वा भा० भावे क्तिन् अभावे न०त०। ६ दानाभावे स्त्री "मा नो अरातिरीशत" ऋ० २,७,२। "अरातिरदानम् शत्रुर्वा वेदे शत्रौ अरातिशब्दः स्त्री" भा०। अरातिरिवा-चरति। आत्मनः अरमिच्छति क्यच् अरातीयति। शत्रुतुल्यमचरति तदिच्छति वेत्यर्थे। "य उक्त यजमने यारातीयति" शत० ब्रा०। योऽस्मभ्यमरातीयात्" यजु० ११, ८०। [अथ० १०,६,१।

**अरातीयु** त्रि० अरातिरिव आचरति अराति+क्यच्–उ। शत्रुतुल्याचारशीले "अरातीयोर्भ्रातृव्यस्य दुर्हृदः"

**अरातीवन्** त्रि० अरातिमिच्छति वेदे मत्वर्थीयो वनिप् पूर्व्वपददीर्घश्च। शत्रुतुल्याचारवति। "अघायुररातीवा मर्चयति द्वयेन" ऋ०१,१४७,४।

**अराधस्** त्रि० राधः धननाम निरु०। तन्नास्ति यस्य। धनरहिते "कदामर्त्तमराधसम्" ऋ०१,८४,८, "अराध-सम् राधसा धनेन रहितम्" भा० "पदा पणीँ रराधसो निबाधस्व" ऋ०८,६१,२ "अराधसं धनहीनम् यज्ञञ्च" भा०।

**अराय** त्रि० नास्ति रा धनं यस्य वेदे पच् समा०। १धनशून्ये स्त्रियां ङीप्॥ "अपमृज्य वा यातुधानानप सर्व्वा अराय्यः" अथ०४,१८,८ रा+भावे घञ् रायो यज्ञादौ दानम् न०ब०। २तच्छून्ये त्रि०। "नारायासी न ज्वह्लवः" ऋ० ८।६१।११, "अरायाः अधनाः अहविष्का वा" भा० "अरायेभ्यो-जिघत्सुभ्य इमं मे परिरक्षत" अथ० ८,२,२०।

**अराल** पु० ऋ-विच् अरमालाति आ+ला–क। १ सर्ज्ज-रसे २ मत्तहस्तिनि। ३ कुटिले त्रि०। "तत्रामरालयम-रालमरालकेशी" नैष० "भित्त्वा निराक्रामदरालकेश्याः" रघुः "नीवक्त्रमालीयमरालपक्ष्मणः" कुमा०। ४ वेश्यायां स्त्री

**अरावन्** त्रि० रा-वनिप् न०त०। अदातरि। "अरावा चन मर्त्यः" ऋ०८,८,४, "पाहि धूर्त्तेररावणः, ऋ०१,३६, १५ स्त्रियां ङीप् वनोरश्च। अरावरी।

**अरि** पु० ऋ–इन्। १ शत्रौ २ रथाङ्गे, चक्रे, ३विट्खदिरे, ४कामक्रोधलोभमोहमदमात्सर्येषु षट्सु, तत्संख्यासाम्यात् ५षट्संख्यायां, ६ ज्योतिषप्रसिद्धे लग्नावधिके षष्ठस्थाने ७ ईश्वरे च। तत्र शत्रौ "दूरात्प्रशमितारिभिः" "विजि-तारिपुरः पुरः" रघुः। "नारीणामनुकूलमाचरसि चेज्-जानासि" का०प्र० "अरिकरिहरणार्थम्" लीला०। "नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेत् द्विजम्" मनुः। चक्रे "गदारिखड्ग पद्माढ्यम्" विष्णुध्यानम्। कामादौ "कृतारिषड्वर्गजयेन" किरा०। ईश्वरे अरिधामश् शब्दे उ०विट्खरि अरिमेदः। "सितासितौ चन्द्रमसो न कश्चित् बुधः शशी सौम्यसितौ रवीन्दू। रवीन्दुभौमा रवितस्त्वमिता" इति ज्योतिषोक्तेषु रव्यादीनां दशुक्रमन्दादिषु। यथा रवेः शुक्रशनी, कुजस्य बुधः, बुधस्य शशी, गुरोः बुधशुक्रौ शुक्रस्य रविचन्द्रौ" शनेः रविचन्द्रभौमाः। "नीचस्थितेऽरि-गेहगेऽथ पराजिते वा जीवे भृगौ व्रतविधौ स्मृतिकर्महीनः" ज्योति० एते च नैसर्गिका अरयः तात्कालिकास्तु "चतुर्थदश-वित्तान्त्यविनाशस्थाः परस्परम्। तत्कालमित्राण्युच्चस्थः कैश्चिदुक्तोऽन्यथा रिपुः" ज्योतिषोक्तेः तत्काले तत्तद्राशिस्थ-ग्रहापेक्षया २,३,४,१०,११,१२ स्थानभिन्नेषु १,५,६, ७,८,९ स्थानेषु स्थिताः ग्रहाः तथाहि कर्मकाले ये ग्रहा यत्र राशौ तिष्ठन्ति तेषां यदपेक्षया १,५,६,७,८,९,स्थान